अभ्यासार्थ प्रश्नपत्र (2022–23)

कक्षा : 12th | कोड – A

रोल नं0. ☐☐☐☐☐☐☐☐☐☐

# संस्कृत

# SANSKRIT

ACADEMIC/OPEN

समय : 3 घण्टे | पूर्णांक – 80

---

- कृपया जांच कर लें कि इस प्रश्न–पत्र में मुद्रित पृष्ठ 5 तथा प्रश्न 18 हैं।
- प्रश्न–पत्र में दाहिने हाथ की ओर दिये कोड नम्बर तथा सैट का कोड छात्र उत्तर–पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।
- उत्तर–पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।
- उत्तर–पुस्तिका के अतिरिक्त कोई अन्य उत्तर–पुस्तिका नहीं दी जाएगी। अतः आवश्यकतानुसार ही लिखें और लिखित उत्तर न काटें।
- परीक्षार्थी प्रश्न–पत्र पर अपना रोल नम्बर अवश्य लिखें।
- प्रश्नों के उत्तर देने से पहले यह सुनिश्चित कर लें कि आपको सही और पूर्ण प्रश्न–पत्र दिया गया है, परीक्षा के बाद इस सम्बन्ध में कोई दावा मान्य नहीं होगा।

निर्देशः– * प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
* प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
* श्रेष्ठ–अंकानां प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।



Downloaded from cclchapter.com

## (खण्ड–क) अपठित–अवबोधनम्

1. अधोलिखितं अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत– 2x5=10

रामायणं प्रसिद्धं धार्मिकं ग्रन्थम् अस्ति। अस्मिन् ग्रन्थे मर्यादापुरुषोत्तमस्य श्रीरामस्य जीवनवृत्तान्तं वर्तते। अस्य लेखकः (कविः) महर्षिः वाल्मीकिः आसीत्। सः आदिकविः आसीत्। अतः तस्य रचना 'आदिकाव्यम्' इति कृत्वा विद्वांसः स्मरन्ति। एतत् काव्यं अनुष्टुप् छन्दसि निबद्धम्। अत्र श्लोकानां संख्या चतुर्विंशतिसहस्रं वर्तते। रामायणे 'बालकाण्ड – अयोध्याकाण्ड – अरण्यकाण्ड – किष्किन्धाकाण्ड – सुन्दरकाण्ड – युद्धकाण्ड – उत्तरकाण्ड' इति सप्तकाण्डानि सन्ति। कचन विद्वांसः बालकाण्डं, उत्तरकाण्डं च अवान्तरकालिकं प्रक्षेपं मन्यन्ते। रामायणं वस्तुतः सरससंस्कृतेन रचितम् आदर्शानां दर्पणम् इव भासते।

प्रश्नाः–

(क) रामायणं कीदृशं ग्रन्थम् अस्ति ?
(ख) रामायणस्य लेखकः कः आसीत् ?
(ग) रामायणे कति काण्डानि सन्ति ?
(घ) रामायणे कस्य जीवनवृतान्तं वर्तते ?
(ङ) 'रामायणे' इति पदे का विभक्तिः ?

## (खण्ड–ख) रचनात्मक–कार्यम्

2. विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत– 6x1=6

(क) मम प्रियकविः (ख) अनुशासनम् (ग) समयस्य सदुपयोगः

## (खण्ड–ख) पठित–अवबोधनम्

3. अधोलिखितगद्यांशस्य हिन्दीभाषाया सरलार्थः कार्यः। 4x1=4

(क) गतस्य वर्षत्रयस्य आकलनात् ज्ञायते यद् विभागस्य कार्यनैपुण्यं दशगुणैः वर्धितम्। खाद्ये अपमिश्रणं न्यूनीभूतम्। अतः उपभोक्तृणामपि अभियोगो नास्ति विभागस्य विपक्षे। मन्त्रिणां मध्येऽपि तस्य सुख्यातिः

अथवा

(ख) पुनः किमासीत्। मम वीरदर्पस्य शौर्यस्य च प्रज्जवलितं ज्योतिस्तत्रैव निर्वाणमभूत्। चौरनिग्रहः कीदृशः निजप्राणपरित्राणमेव मे अन्वेषणीयमभवत्। लगुडं प्रक्षिप्य कोष्ठके निलीनोऽभवम्। तत एव च कम्पितकण्ठेन चीत्कारमकरवम्–लोकाः! आगच्छत, चौरः प्रविष्टोऽस्ति।



Downloaded from cclchapter.com

4. अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थः कार्यः– 4x1=4

(क) ईशावास्यमिदं सर्वं यत्किञ्चजगत्यां जगत्।

(ख) तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्।।

अथवा

(क) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ख) कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।

5. अधोलिखितासु सूक्तिषु द्वयोः भावार्थः हिन्दीभाषायां लेखनीय :– 2x2=4

(क) वाग्भूषणं भूषमण्।

(ख) द्वित्राण्यहान्यर्हसि सोढुमर्हन्।

(ग) तटाकोदारसंस्थानां परीवाह इवाम्भसाम्।

(घ) स्वर्गभूमिं कुर्शीति वदन्ति।

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 2x2=4

अहं देशसेवां कर्तुं गृहाद् बहिरभवम्। मया निश्चितमासीत् यत् 'एतावन्ति दिनानि स्वोदरसेवायै क्लिष्टोऽभवम्। इदानीं कियन्तं कालं देशसेवायामपि लक्ष्यं ददामि।'

प्रश्नाः–

(क) किमर्थं बहिरभवम् ?

(ख) किमर्थं क्लिष्टोऽभवम् ?

7. अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि–

कुर्वन्नेह कर्माणि जिजीविषेच्छतं समाः। 1x2=2

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

प्रश्नाः–

(क) शतं समाः कथं जिजीविषेत् ?

(ख) 'अस्ति' इति पदस्य कः पदपरिचयः ?

8. रेखाकिंतपदानि आधृत्य प्रश्ननिर्माणं कुरुत– 1x2=2

(क) दिदेश कौत्साय समस्तमेव।

(ख) विस्फारितशरासनाः आयुधीयश्रेणयः कुमारं तर्जयन्ति।



Downloaded from cclchapter.com

## (खण्ड–घ) संस्कृतसाहित्य–परिचयः

9. महाकविकालिदासस्य अथवा अम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः– 1x4=4

10. अधस्तनयोः पुस्तकयोः मध्ये एकस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः– 1x4=4

(1) रघुवंशम् (2) ईशावास्योपनिषद्

## (खण्ड–ङ) छन्दोऽलंकार–परिचयः

11. अधोनिर्दिष्टछन्दस्सु द्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत– 2x4=8

(क) शिखरिणी (ख) अनुष्टुप् (ग) मालिनी

12. अधः प्रदत्तेषु अलंकारेषु द्वयोरेव लक्षणोदाहरणौ लिखत– 2x4=8

(क) रूपकः (ख) उपमा (ग) अर्थान्तरन्यासः

## (खण्ड़–च) अनुप्रयुक्त व्याकरणम्

13. दीर्घ–सन्धेः अथवा यण् सन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1x2=2

14. कर्ताकारकस्य अथवा अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1x2=2

15. द्वन्द्वसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत।1x2=2

## (खण्ड़–छ) बहुविकल्पीय–वस्तुनिष्ठप्रश्नाः

16.(i) 'आहुरविद्यया' इति पदे कः सन्धिविच्छेदः ? 1x2=2

(क) आहुर + अविधया (ख) आहुरा + विद्यया

(ग) आहुः + अविद्यया (घ) आहुः + रविद्या

(ii) 'जनयेत् + अज्ञानाम्' इति पदे किं संधिपदम् ?

(क) जनयेज्ञानाम् (ख) जनयेदज्ञानाम्

(ग) जनेयेदाज्ञायम् (घ) जनयैज्ञानाम्



Downloaded from cclchapter.com

17. (i) 'ग्रामगतः' इति पदे कः विग्रहोऽस्ति ? 1x2=2

(क) ग्रामःगतः (ख) ग्रामं गतः
(ग) ग्रामाय गतः (घ) ग्रामस्य गतः

(ii) 'पुण्यः व असौ अनुभावः' इति विग्रहे किं समस्तपदम् ?

(क) पुण्यानुभावः (ख) पुण्यश्चपुण्यः
(ग) पुण्यश्चभावः (घ) पुण्यभावः

## (खण्ड–ज) लघूत्तरात्मकप्रश्नाः

18. यथानिर्देशं अधस्तनप्रश्नानां उत्तराणि संस्कृतेन लिखत– 1x10=10

1. 'किम्' पुँल्लिंगे तृतीयाविभक्तौ एकवचने किं रूपम् ?
2. 'महाद्रुमेण' इति पदे का विभक्तिः ?
3. 'भविष्यति' इति पदे कः लकारः ?
4. 'पठन्ति' इत्यत्र कः पुरुषः ?
5. 'गत्वा' इति पदे कः प्रत्ययः ?
6. 'जन+तल्' अनयोः संयोगे किं रूपम् ?
7. 'विना' इति उपपदयोगे का विभक्तिः ?
8. 'अशुभम्' इति पदस्य विलोमपदम् किम् ?
9. 'विद्वान्' इति पदस्य विलोमपदं किम् ?
10. पयोदः इति पदस्य समानार्थकपदं किम् ?



Downloaded from cclchapter.com

अभ्यासार्थ प्रश्नपत्र (2022–23)

कक्षा : 12th

कोड – B

रोल नं0. [ | | | | | | | | | ]

संस्कृत

**SANSKRIT**

ACADEMIC/OPEN

समय : 3 घण्टे

पूर्णांक – 80

---

- कृपया जांच कर लें कि इस प्रश्न–पत्र में मुद्रित पृष्ठ 4 तथा प्रश्न 18 हैं।
- प्रश्न–पत्र में दाहिने हाथ की ओर दिये कोड नम्बर तथा सैट का कोड छात्र उत्तर–पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।
- उत्तर–पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।
- उत्तर–पुस्तिका के अतिरिक्त कोई अन्य उत्तर–पुस्तिका नहीं दी जाएगी। अतः आवश्यकतानुसार ही लिखें और लिखित उत्तर न काटें।
- परोक्षार्थी प्रश्न–पत्र पर अपना रोल नम्बर अवश्य लिखें।
- प्रश्नों के उत्तर देने से पहले यह सुनिश्चित कर लें कि आपको सही और पूर्ण प्रश्न–पत्र दिया गया है, परीक्षा के बाद इस सम्बन्ध में कोई दावा मान्य नहीं होगा।

निर्देशः– * प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
*प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
*श्रेष्ठ–अंकानां प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।

(खण्ड–क) अपठित–अवबोधनम्

1. अधोलिखितं अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत– 2X5=10

सत्संगतिः धियः हरति। वाचि सत्यं सि×**pfr**। मानोन्नतिं करोति। पापम् अपाकरोति। मनः प्रसादयति। सर्वत्र यशः तनोति। कथय, मनुष्याणां कृते सत्संगतिः किं न करोति, अर्थात् सर्वेषामेव उत्तमगुणानां विकासं करोति। ईदृशः अस्ति सत्संगतेः महिमा। अयम् एकः स्वाभाविकः अभिप्रायोऽस्ति यत् मनुष्यस्य संगतिः यादृक्प्रवृत्तिधारकेण सह भवति, सः तादृशः एव भवति। यदि तस्य उत्थानम् उपवेशनं दुष्टैः सह, तदा सोऽपि दुष्टः भविष्यति।



Downloaded from cclchapter.com

परं सज्जनैः साकं संसर्गात् स एव जनः सुजनः भवितुं शक्नोति। प्रभावस्तु अवश्यमेव पतति अन्योऽन्ययोः एतत् तु स्वीकरणीयमेव भविष्यति। यदा वयं संगतेः प्रभावं जड़पदार्थेषु पश्यामः तदा चेतनः प्राणी कथं नु प्रभवितुं क्षमते।

प्रश्नाः–

(क) सत्संगतिः धियः किं हरति ?

(ख) सत्संगतिः केषां विकासं करोति ?

(ग) सज्जनैः साकं संसर्गात् जनः कीदृशः भवितुं शक्नोति ?

(घ) सत्संगतेः प्रभावं वयं केषु पदार्थेषु पश्यामः ?

(ङ) 'भवितुम्' अत्र कः प्रत्ययः ?

(खण्ड–ख) रचनात्मकं–कार्यम्

2. विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत– 6X1=6

(क) मम विद्यालयः (ख) परोपकारः (ग) सदाचारः

(खण्ड–ग) पठित–अवबोधनम्

3. अधोलिखितगद्यांशस्य हिन्दीभाषायां सरलार्थः कार्यः। 4X1=4

(क) मनुष्याणां हिंसावृत्तिस्तु निरवधिः। पशुहत्या तु तेषाम् आक्रीडनम्। केवलं विक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं च पशुघातं कुर्वन्ति। तेषां पशुप्रहार–व्यापारमालोक्य जडानामपि अस्माकं विदीर्यते हृदयम्।

अथवा

(ख) एकस्मिन् दिने श्रीनायारः पत्रमेकं धृत्वा मस्तकमवनमय्य पठन् आसीत्। नेत्रतीराद् विगलिता अश्रुधारा आर्द्रीकरोति स्म पत्रस्य अर्धाधिकं भागम्। तदानीमेव तस्य कार्यालयलिपिकः श्रीदासः श्री नायारः तमुक्तवान्–अधुना मम गमनसमयः समुपागत एव।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थः कार्यः– 4X1=4

(क) न किञ्चिदपि कुर्वाणःसौख्यैर्दुःखान्यपोहति।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः।

अथवा

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्धयेदकर्मणः।

5. अधोलिखितासु सूक्तिषु द्वयोः भावार्थः हिन्दीभाषायां लेखनीय :– 2X2=4

(क) जगाद भूयो जगदेकनाथः।

(ख) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

(ग) हरति अतिमलिनमपि दोषजातं गुरूपदेशः।

(घ) तेन त्यक्तेन भु×जीथाः।



Downloaded from cclchapter.com

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 2X2=4

तावदकस्मादुत्थितो महान् झ×झावातः, एकः सायंसमयः प्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः।

प्रश्नाः–

(क) अकस्मात् कः उत्थितः ?
(ख) अन्धकारः काभिः द्विगुणितः ?

7. अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तराणि संस्कृतभाषया लेखनीयानि–
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। 1X2=2
सःयत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

प्रश्नाः–

(क) लोकः कम् अनुवर्तते।
(ख) 'सः' इति पदे का विभक्तिः किं वचन×च ?

8. रेखाकिंतपदानि आधृत्य प्रश्ननिर्माणं कुरुत– 1X2=2
(क) कोकिन! विरसान् दिवसान् यापय।
(ख) मया सर्वोऽपि ब्राह्मणसमूहो दक्षिणया तोषितः।

## (खण्ड–घ) संस्कृतसाहित्य–परिचयः

9. महाकवि–बाणभट्टस्य अथवा श्री मथुरानाथशास्त्रिणः संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4X1=4

10. अधस्तनयोः पुस्तकयोः मध्ये एकस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः– 4X1=4
(1) पाषाणी कन्या (2) उत्तररामचरितम्

## (खण्ड–ङ) छन्दोऽलङ्कार–परिचयः

11. अधोनिर्दिष्टछन्दस्सु द्वयोरेव संस्कृतभाषया लक्षणोदाहरणौ लिखत– 2X4=8
(क) उपजातिः (ख) उपमा (ग) शिखरिणी।

12. अधः प्रदत्तेषु अलंकारेषु द्वयोरेव लक्षणोदाहरणौ संस्कृतभाषया लिखत– 2X4=8
(क) अनुप्रासः (ख) उपमा (ग) अर्थान्तरन्यासः

## (खण्ड़–च) अनुप्रयुक्त–व्याकरणम्

13. दीर्घसन्धेः अथवा व्य×जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1X2=2

14. अपादानकारकस्य अथवा करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1X2=2

15. तत्पुरुषसमासस्य अथवा द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 1X2=2



Downloaded from cclchapter.com

## (खण्ड़–छ) बहुविकल्पीय–वस्तुनिष्ठप्रश्नाः

16. अधस्तनप्रश्नानां लिखित्तोत्तरविकल्पेषु शुद्धविकल्पं चित्वा लिखत– 1X2=2

(i)'सोऽपि' इति पदे कः सन्धिविच्छेदः ?

(क) सो + पि (ख) सो + ऽपि

(ग) सः + अपि (घ) स + अपि

(ii) 'तेन + एव' इति पदे किं सन्धिपदम् ?

(क) तनैव (ख) तेनैव

(ग) तेनिव (घ) तेनव

17. (i) 'प्रकृतिसिद्धम्' इति पदे कः विग्रहोऽस्ति ? 1X2=2

(क) प्रकृतेः सिद्धम् (ख) प्रकृत्या सिद्धम्

(ग) प्रकृति सिद्धम् (घ) प्रकृतिः सिद्धम्

(ii) 'तपोधनः' इति पदे कः समासः ?

(क) बहुव्रीहि–समासः (ख) द्विगु–समासः

(ग) द्वन्द्व–समासः (घ) अव्ययीभाव–समासः

## (खण्ड–ज) लघूत्तरात्मकप्रश्नाः

18. यथानिदेशं अधस्तनप्रश्नानां उत्तराणि संस्कृतेन लिखत– 1X10=10

1. 'अस्मद्' शब्दस्य प्रथमाविभक्तौ बहुवचने किं रूपम् ?
2. 'तेषाम्' इति पदे का विभक्तिः ?
3. 'गमिष्यति' इति पदे कः पुरुषः ?
4. 'आसीत्' इति पदे कः धातुः ?
5. 'आदाय' इति पदे कः प्रत्ययः ?
6. 'गम् + क्तिन्' अनयोः संयोगे किं रूपम् ?
7. 'बहिः' इति उपपदयोगे का विभक्तिः ?
8. 'जलम्' इति पदस्य पर्यायपदं लिखत।
9. 'पृथिवी' इति पदस्य पर्यायपदं लिखत।
10. 'दुष्कृतम्' इति पदस्य विलोमपदं लिखत।



Downloaded from cclchapter.com